# shrIdurgAstotram from Rudrayamala

# श्रीदुर्गास्तोत्रम् रुद्रयामलान्तर्गतम्

## Document Information

Text title : durgAstotram 3 from rudrayAmala

File name : durgAstotramrudrayAmala.itx

Category : devii, durgA, devI

Location : doc_devii

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Latest update : December 9, 2016

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 31, 2020

*sanskritdocuments.org*

# श्रीदुर्गास्तोत्रम् रुद्रयामलान्तर्गतम्

अथ दुर्गास्तोत्रम् ।
श्रीभैरव उवाच
अधुना देवि वक्ष्यामि दुर्गास्तोत्रं मनोहरम् ।
मूलमन्त्रमयं दिव्यं सर्वसारस्वतप्रदम् ॥ १॥

दुर्गार्तिशमनं पुण्यं साधकानां जयप्रदम् ।
दुर्गाया अङ्गभूतं तु स्तोत्रराजं परात्परम् ॥ २॥

श्रीदुर्गास्तोत्रराजस्य ऋषिर्देवो महेश्वरः ।
छन्दोऽनुष्टुप् देवतापि श्रीदुर्गाष्टाक्षरा शिवे ॥ ३॥

दुं बीजञ्च परा शक्तिः नमः कीलकमीश्वरि ।
धर्मार्थकाममोक्षार्थे श्रीदुर्गास्तोत्रपाठे विनियोगः ॥ ४॥

अथ ध्यानम्
दूर्वानिभां त्रिनयनां विलसत्किरीटां
    शङ्खाब्जखड्गशरखेटकशूलचापाम् ।
सन्तर्जनीं च दधतीं महिषासनस्थां
    दुर्गान्तवारकुलपीठगतां भजेऽहम् ॥ १॥

तारं हारं मन्त्रमाला सुबीजं ध्यायेदन्तर्यो बलं बालकान्तः ।
तस्य स्मारं स्मारमङ्घ्रिद्वयं च रम्यायाति स्वर्गता कामवश्या ॥ २॥

मायां जपेद्यस्तव मन्त्रमध्ये दुर्गे सदा दुर्गतिखेदखिन्नः ।
भवेच्च भूमौ नृपमालिमालामाणिक्यनिर्धृष्टपदारविन्दः ॥ ३॥

चाक्रियं यदि जपेत्तवाऽङ्घ्रिके चक्रमध्यगत ईश्वरीश्वरि ।
साधको भवति चक्रवर्तिनां नायको मम विलासकोविदः ॥ ४॥

चक्रिबीजमपरं स्मरेच्छिवे योऽरिवर्गविहितादतव्ययः ।
आनिमेऽलगते जपेद्रिपून् वाजिवारणरथाश्रितो नरः ॥ ५॥

दुर्गाबीजं यो जपेत् प्रेतभूमौ सायं माया भस्मनाऽऽलिप्तकायः ।
त्रिर्वारणानां नायको देवि ।
मन्त्री भुक्त्वा राज्यं प्राज्यमाज्यं करोति ॥ ६॥

वायव्यबीजं यदि साधको जपेत् प्रियाकुचद्वन्द्वविमर्दनक्षमः ।
समस्तकान्ताजननेत्रवागुरो विलासहंसो भविता स पार्वति ॥ ७॥

विश्वे विश्वेश्वरि यदि जपेत् कामवेलाकलातौ
  रात्रौ मात्राक्षरविलसितं मास ईशानि नाम ।
तस्य स्मेराननसरसिजा भ्राजमानाङ्गलक्ष्मी
  वश्यावश्यं सूरपूरवधूमौलि माला वशामा ॥ ८॥

भूगेहाश्रित वह्निवृत्तविलसन्नागारवृत्तार्चित-
  व्यग्रारोल्ल सिताग्निकोण विलसच्छ्री बिन्दु पीठस्थिताम् ।
ध्यायेच्चेतसि शर्वपत्नि भवतीं माध्वीरसाघूर्णितां
  यो मन्त्री स भविष्यति स्मरसमः स्त्रीणां धरण्यां दिवि ॥ ९॥

दुर्गास्तवं मनुमयं मनुराजमौलि-
  र्माणिक्यमुत्तमशिवाङ्गरहस्यभूतम् ।
प्रातः पठेद्यदि जपावसरेऽर्यमायां
  भूमौ भवेत् स नृपतिर्दिवि देवनाथः ॥ १०॥

इदं स्तोत्रं महापुण्यं पञ्चाङ्गैकशिरोमणिम् ।
यः पठेदर्धरात्रे तु तस्य वश्यं जगत्त्रयम् ॥ ११॥

इदं पञ्चाङ्गमखिलं श्रीदुर्गाया रहस्यकम् ।
सर्वसिद्धिप्रदं गुह्यं सर्वदा परिपूरकम् ॥ १२॥ सर्वाशा
गुह्यं मन्त्ररहस्यं तु तव भक्त्या प्रकाशितम् ।
अभक्ताय न दातव्यमित्याज्ञा पारमेश्वरी ॥ १३॥

श्रीदेव्युवाच
भगवन् भवता तेन कथनेन महेश्वर ।
श्रीपञ्चाङ्गस्य दुर्गाया अथ प्रीतास्म्यहं परम् ॥ १४॥

श्रीभैरव उवाच
इदं रहस्यं परमं दुर्गासर्वस्वमुत्तमम् ।

पञ्चाङ्गं वर्णितं गोप्यं गोपनीयं स्वयोनिवत् ॥ १५॥

इति श्रीरुद्रयामलेतन्त्रे देवीरहस्ये दुर्गास्तोत्रं सम्पूर्णम् ॥

Proofread by PSA Easwaran psaeaswaran at gmail.com

*shrIdurgAstotram from Rudrayamala*

pdf was typeset on May 31, 2020

Please send corrections to *sanskrit@cheerful.com*